"मध्याह्ने भोज्यवेलायां समुत्तीर्य्य सरित्तटे" ।
ददर्श शीला सा स्त्रीणां समूहं रक्तवाससां ॥
चतुर्द्दश्यामर्च्चयन्तं भक्त्या देवं पृथक् पृथक्" ।
इति भविष्योत्तरीयान्मध्याह्नव्यापिनी तिथि-र्ग्राह्येति वाच्यं । पूर्व्वाह्णो वै देवानामिति श्रुत्या-दिभिः पूर्व्वाह्णे दैवकृत्यविधानात् । विध्यसम-भिव्याहृतार्थवादेन तद्बाधायोगात् किन्तु तस्यैव गौणकालबोधकं तत् । कालमाधवीयोऽप्येवं । भविष्येऽपि पूजाविधायको मध्याह्नो नोक्तः । यथा,—

"कृत्वा दर्भमयानन्तं वारिधान्यां निवेश्य च ।
पूजयेद्गन्धपुष्पाद्यैर्नैवेद्यैर्विविधैरपि ॥
चतुर्द्दशफलैर्मूलैर्जलजैः कुसुमैरपि ।
यवगोधूमशालीनां चूर्णैनैकतरस्य च ॥
कृत्वा पूपदयं तस्मै दद्यादेकं घृतान्वितं ।
स्वयमेकन्तु भुञ्जीत करे बद्धा सुडोरकं ॥
चतुर्दशग्रन्थियुक्तं कुङ्कुमेन विलेपितं ।
सुविन्यस्तं विष्णुनामप्रतिग्रन्थिसमन्वितं ।
चतुर्दशसूत्रमयं सूत्रं कार्पासमेव च" ॥ * ॥

पूजाडोरकबन्धनमन्त्रस्तु रत्नाकरे,—

"अनन्तसंसारमहासमुद्रे
मग्नान् समभ्युद्धर वासुदेव ।
अनन्तरूपिन् विनियोजयस्व
अनन्तरूपाय नमो नमस्ते" ॥

इति गणमुक्ता ।
"अनेन डोरकं बद्धा भोक्तव्यं सुस्थमानसैः" ।
इत्यर्द्धं भविष्योत्तरीयं कालकौमुद्यां लिखित-मिति ॥ * ॥ तथा,—

"पापोऽहं पापकर्म्माहं पापात्मा पापसम्भवः ।
त्राहि मां पुण्डरीकाक्ष सर्व्वपापहरो भव ॥
अद्य मे सफलं जन्म जीवितञ्च सुजीवितं ।
यत्तवाङ्घ्रियुगाम्भोजे मूर्द्धा मे भ्रमरायते" ॥

इत्यार्थ्या नमस्कुर्य्यात् । अनन्तकथामप्यत्र शृ-ण्वन्ति । इति तिथ्यादितत्त्वं ॥ * ॥ * ॥ अथ प्रयोगः । आचम्य स्वस्तिवाच्य सङ्कल्पं कुर्य्यात्,—
"अद्य भाद्रे मासि शुक्ले पक्षे चतुर्दश्यां तिथा-वारभ्य अमुकगोत्रः श्रीअमुकः धनधान्यपुत्र-पौत्राद्यनवच्छिन्नसन्ततिप्राप्तिकामः श्रीविष्णु-प्रीतिकामो वा चतुर्दशवर्षपर्य्यन्तं भगवदनन्त-भट्टारकपूजाचतुर्दशग्रन्थियुक्तडोरकरमूलबन्धन-कथाश्रवणब्राह्मणसंप्रदानकातपसिततण्डुलप्रस्थ-द्वयघटितपूपार्द्धोपकल्पनतदर्द्धात्मकर्त्तृकभोजन-रूपमनन्तव्रतमहं करिष्ये" इति सङ्कल्प्य सूक्तं पठेत् ॥ * ॥ ततो गुण्डिकया अष्टदलपद्मं निर्म्माय तन्मध्ये घटमारोप्य शालग्रामं वा चतुर्दिक्षु ध्वजां निवेश्य यथोक्तविधिना गणेशनवग्रहदिक्-पालशिवदुर्गालक्ष्मीनारायणपूजां कृत्वा शक्रं ध्या-येत्,—"ॐ महेन्द्रं मत्तैरावतस्कन्धस्थं सहस्रनय-नोज्ज्वलं । मणिकाञ्चनघटितनानालङ्कारभूषितं वज्रहस्तं शच्यन्वितं देवगन्धर्व्वगणैर्वृतं मुनिगणैः स्तूयमानं" ॥ एवं ध्यात्वा महेन्द्राय नमः एवं क्रमेण संपूज्य प्रणमेत्,—

"ॐ शक्रः सुरपतिश्चैव वज्रहस्तो महाबलः ।
ऐरावतगजारूढ़ः सहस्राक्षो नमोऽस्तु ते" ॥

ततो दक्षपात्रे जलं संस्थाप्य हस्तं दत्त्वा समुद्र-मावाहयेत्,—
ॐ गङ्गेचेत्यादिनावाह्य समुद्रं पूजयेत् ॥ * ॥
ततो भूतशुद्ध्यादिप्राणायामान्तं कृत्वा अनन्तं ध्यायेत्,—

"ॐ दिव्यसिंहासनासीनं देवेशं गरुड़ध्वजं ।
शुक्लवर्णं चतुर्बाहुं नागयज्ञोपवीतिनं ॥
शङ्खचक्रगदापद्मधरं पीताम्बरं विभुं ।
श्रिया वाण्या च संश्लिष्टं किरीटादिसमुज्ज्वलं ॥
फणाशतसमायुक्तं जगन्नाथं जगद्गुरुं ।
अनन्तं चिन्तयेद्देवं नारदाद्यैरुपस्तुतं" ॥

एवं ध्यात्वा स्वशिरसि पुष्पं दत्वा मानसोपचारैः संपूज्य अर्घ्यं संस्थाप्य ।
आं हृदयाय नमः एवं षड़ङ्गानि विन्यस्य पुन-र्ध्यात्वावाहयेत् ।

"ॐ आगच्छानन्त देवेश पत्नीभ्यां वाहनान्वित ।
गन्धर्व्वादिगणोपेत सान्निध्यमिह कल्पय" ॥

ततः पूजयेत् ।
पाद्यं गृहीत्वा,—
"ॐ पाद्यं गृहाण देवेश सुरासुरमनोहरं ।
तुष्टो मे भव देवेश नरसिंह नमोऽस्तु ते" ॥
अर्घ्यं गृहीत्वा,—
"अर्घ्यं गृहाण देवेश सुगन्धिकुसुमान्वितं ।
दूर्व्वाक्षतसमायुक्तं नमस्ते विश्वमूर्त्तये" ॥
आचमनीयं गृहीत्वा,—
"ॐ इदमाचमनीयन्ते दिव्यतोयोद्भवं प्रभो ।
भक्त्या दत्तं मयानन्त नमस्ते पन्नगाधिप" ॥
एवं मधुपर्कं पुनराचमनीयं स्नानीयं वस्त्रयुग्मञ्च दद्यात् ॥ * ॥
गन्धः,—
"ॐ गन्धोऽयं देवदेवेश कुङ्कुमागुरुसम्भवः ।
यथाशक्त्या मया दत्तो देवेश प्रतिगृह्यतां" ॥
पुष्पं,—
"ॐ पुष्पं गृहाण भोऽनन्त सुगन्धिद्रव्यमुत्तमं ।
पद्मनाभ नमस्तेऽस्तु कुशलं कुरु सर्व्वदा" ॥
धूपः,—
"ॐ धूपोऽयं ते महाभाग दशाङ्गोऽगुरुणा सह ।
मया दत्तः प्रभो विष्णो गृह्यतां सुरनायक" ॥
दीपः,—
"ॐ दीपं गृहाण भोऽनन्त आज्ज्वल्यमानमद्भुतं ।
त्वं गृहाण सदा देव रक्ष मां घोरसागरात्" ॥
यज्ञोपवीतं,—
"ॐ ऋगयजुःसाममन्त्रेण त्रिवृत्तं पद्मयोनिना ।
सावित्रीग्रन्थिसंयुक्तमुपवीतं तवानघ" ॥
नैवेद्यं,—
"ॐ नानाभक्ष्यसमायुक्तं चतुर्द्दशफलैर्युतं ।
भक्त्या सम्पादितं देव सपूपं गृह्यतां विभो" ॥*॥
ततो बलभद्रं संपूज्य स्तुतिं कुर्य्यात्,—
"ॐ बलभद्रं महात्मानं हलिनं लाङ्गलायुधं ।
कादम्बरीमदोन्मत्तं नमामि बलदेवकं" ॥

ततः आवरणदेवताः पूजयेत् ।
ॐ गणेशाय नमः । एवं लोकपालेभ्यः । नव-ग्रहेभ्यः । अष्टवसुभ्यः । एकादशरुद्रेभ्यः । द्वादशा-दित्येभ्यः । अनन्तादिनागेभ्यः । मत्स्यादिदशाव-तारेभ्यः । मासेभ्यः । ऋतुभ्यः । वत्सरेभ्यः । धर्म्माय । अधर्म्माय । ज्ञानाय । अज्ञानाय । वैराग्याय । अवैराग्याय । ऐश्वर्य्याय । अनैश्वर्य्याय । शिवाय । दुर्गायै । पृथिव्यै । गङ्गायै । यमुनायै । महालक्ष्म्यै । सरस्वत्यै । गरुड़ाय । शङ्खाय । चक्राय । गदायै । पद्माय । कौस्तुभाय । सूर्य्यमण्डलाय । सोममण्डलाय । वह्निमण्डलाय । वायुमण्डलाय । सर्व्वेभ्यो देवेभ्यः । सर्व्वाभ्यो देवीभ्यः ॥ * ॥
ततः स्तुतिं पठेत्,—

"ॐ अनन्तसंसारमहासमुद्रे
मग्नं समभ्युद्धर वासुदेव ।
अनन्तरूपिन् विनियोजयस्व
अनन्तरूपाय नमो नमस्ते ॥
नमोऽस्त्वनन्ताय सहस्रमूर्त्तये
सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते
सहस्रकोटीयुगधारिणे नमः ॥
हृदिस्थं सर्व्वदेवानां इन्द्रियाणां गुणातिगं ।
सर्व्वपापहरं देवं प्रणमामि जनार्द्दनं ॥
अनन्तरूपेण बिभर्त्ति पृथ्वीं
अनन्तलक्ष्मीं विदधाति तुष्टः ।
अनन्तभोगान् प्रददाति तुष्टः
अनन्तमोक्षं पुरुषे प्रहृष्टः ॥
प्रणमामि हृषीकेशं वासुदेवं जगद्गुरुं ।
सृष्टिस्थितिविनाशानां कर्त्तारं प्रणमाम्यहं ॥
राक्षसानामरिं नौमि नौमि दैत्यविमर्द्दकं ।
जगतां हितकर्त्तारं नौमि पङ्केरुहेक्षणं ॥
जन्मजन्मकृतं यच्च बाल्ययौवनवार्द्धके ।
तद्विनाशोतु तत् पुण्यं पापं हर हलायुध ॥
भक्तिहीनं क्रियाहीनं मन्त्रहीनं यदर्च्चितं ।
यथोद्दिष्टामिमां पूजां परिपूर्णां कुरुष्व मे ॥
पापोऽहं पापकर्म्माहं पापात्मा पापसम्भवः ।
त्राहि मां पुण्डरीकाक्ष हरे संसारसागरात्" ॥

ततो घटस्थजलेन संप्रोक्ष्य करमूले डोरकं समर्पयेत् ।
"ॐ इदं डोरमनन्ताख्यं चतुर्द्दशगुणात्मकं ।
सर्व्वदेवमयं विष्णो स्वकरे धारयाम्यहं" ॥
ततो भोज्यमुत्सृजेत् ॥ * ॥

ततः कथां शृणुयात् ।

यथा,—
अरण्यवासमुषितो युधिष्ठिरस्तपो वशी ।
प्राप्तत्रैलोक्यनाथेन कृष्णेन परमात्मना ॥
कथोपकथनं जातं तयोस्तत्र प्रियाप्रियं ।
विशेषेण च गोविन्दं पप्रच्छ च युधिष्ठिरः ॥*॥

युधिष्ठिर उवाच ।

केन व्रतेन देवेश वाञ्छितं प्राप्यते फलं ।
निष्पापाः सकला लोकाः भवन्ति जन्मजन्मनि ॥*॥

श्रीकृष्ण उवाच ।